# ॐ

# षोडस्पटल योगः

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां साधनाप्रकरणंन्नाम

## प्रथमः पटलः

### ॐ नमः शिवाय

वन्दे देवं पुराणं शिवममरुगुरुं भूतलस्थेन मूर्ध्ना ।
नित्यं शान्तं सुसुक्ष्मं त्रिभुवननमितं सर्व्वलोकैकनाथम् ॥
निस्संङ्गं निर्व्वकारं प्रजननमरणक्लेशदोषैर्व्विमुक्तं ।
योगाभ्यासैकवेद्यं त्रिगुणविरहितं नप्रसज्यस्वरूपं ॥१॥

शिवार्थ लोकानाममलशिवधर्म्मं शिवकृतं ।
महाशास्त्रं सारं पशुपतिमतं पाशरहितं ॥
शिवं योगद्योगं पशुपतिसमीपे निगडितो ।
विमुक्त्यै सर्व्वेषामनुवदति योगी नरहरिः ॥
योऽसौ पशुपतिः सोऽयं गोरक्षो रक्षको गवाम् ।
शिवयोगिजनान्नित्य्र योगाभ्यासेषु रक्षतु ॥

निर्व्व्यापारं सुसुक्ष्मं क्षितिजलदहनाकाशवातैर्व्विमुक्तं ।
प्रत्यक्षादिप्रमाणैः केतिभिरविदितं हेतुदृष्टान्तशून्यं ॥
रूपादीनामभावादवयवनिकलादिन्द्रियैरप्रमेयं ।
प्रत्यात्मध्यानगम्यं पटुभिरपि गिरा निष्प्रपञ्च स्वभावं ॥२॥

शास्त्रस्यादिंप्रप्पेतारं सनकं मुनिपुङ्गवं ।
नमस्कृत्य प्रवक्ष्यामि संहितां धर्म्मपुत्रिकां ॥३॥

सिद्धिं प्राप्नोति योगस्य युञ्जन योगी न संशयः ।
विदित्वा साधनोपायं षोडशानान्तु निर्णयं ॥४॥

चत्वारि योगप्रकरणान्यन्तरायाश्चतुर्विधाः ।
तेषाञ्जयचिकित्साश्च द्वे लिङ्गे सिद्धिसूचके ॥५॥

वृद्ध्युपायो विनाशश्च प्रत्यानयनमेव च ।
सिद्ध्युपायश्च विज्ञेयः साधनोपायसंज्ञितः ॥६॥

तानविज्ञाय यो योगी योगं युञ्जन् प्रयत्नतः ।
क्लिश्यति केवलं मूढो नास्य सिद्धिः कदाचन ॥७॥

तस्मादेवं विदित्वादौ त्रितत्त्वञ्च यथाक्रमं ।
दानशिलादिभिश्चित्तं शोधयित्वा विशेषतः ॥८॥

ततो योगः प्रयोक्तव्यस्त्यक्तसङ्गेन योगिना ।
वीतरागेण शान्तेन शुचिना शुद्धचेतसा ॥९॥

अथ साधनोपायानां षोडशानां ।
नामनिर्द्देशलक्षणं व्यारव्यास्यामः ॥१०॥

आदौ ताव च्चत्वारि योग प्रकरणानि ।
साधनप्रकरणमासनप्रकरणं धारणावंशप्रकरणं ध्यानमार्गप्रकरणञ्चेति ॥११॥

षडङ्गः षडुपायश्च षट्साधनमतः परं ।
चतुस्श्रमो द्विरूपश्च त्रिविधः समनन्तरं ॥१२॥

दशोपसर्ग्गा विज्ञेया अष्टैश्वर्य्यगुणास्तथा ।
योगस्याशीतिरष्टाभिः साधनाप्रकरणं स्मृतं ॥१३॥

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ।
तर्क्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥१४॥

विषयेष्वतिसक्तानि इन्द्रियाणि प्रति प्रति ।
चित्तेनाकर्षणं यत्र प्रत्याहारः स उच्यते ॥१५॥

शब्दात् कर्णौ रसज्जिह्वा स्पर्षत्वात्तु त्वगिन्द्रियं ।
गन्धाद् घ्राणं मनोऽधर्म्माद् दृष्टत्वान्नयनं तथा ॥१६॥

नित्याभ्यासाद् विरागाद्वा तस्मादाकृष्य यत्नतः ।
एबत्र वर्त्तुलीकृत्य ध्येये वस्तुनि योजयेत् ॥१७॥

को ध्येयः कस्त्वसौ ध्यातां किं ध्यानं किं प्रयोजनं ।
चत्वार्य्येतानि यो वेत्ति स योगी योग उच्यते ॥१८॥

ध्येयः शिवो ध्यातृ मनो ध्यानमेकाग्रचित्तता ।
दुःखहानीनिर्गुणैश्वर्य्ये स्वातन्त्र्यञ्च प्रयोजनं ॥ १९॥

पूरकः कुम्भकश्चैव रेचकस्तदनन्तरं ।
प्रशान्तश्चैव विज्ञेयः प्राणायामश्चतुर्व्विधः ॥ २०॥

वायोर्ब्बहिर्ग्गती रुद्धा नासिकाभ्यां मुखेन वा ।
देहस्याभ्यन्तरे यत्नाच्छनैराकर्षयेद् बुध ॥२१॥

पादाङ्गुष्ठतलं यावत् पूरणात् पूरकः स्मृतः ।
आपूर्य्य धाराणं यत्तु कुम्भकः समुदीरितः ॥२२॥

ततो निश्शेषवमनं रेचकः समुदाहृतः ।
तुच्छदेहे क्षणं स्थानं प्रशान्तः सोऽभिधीयते ॥२३॥

त्रिर्जानुमण्डलं स्पृश्य छोटिरेकाऽभिधीयते ।
छोटिकाभिर्द्वादशभिर्म्मात्रिका परिकल्पिता ॥२४॥

मात्राद्वादशभिः प्राणः प्राणायाम इति स्मृतः ।
प्राणायामैर्द्वादशभिर्धारणेति प्रकिर्तिता ॥२५॥

धारणाभिर्द्वादशभिर्य्योजना समुदीरिता ।
योजनाभिर्द्वादशभिर्योगसंज्ञा कृता पुरा ॥२६॥

इत्येष धारणावेलापरिवार उदाहृतः ।
नानाप्रकारसिद्धान्तनिस्पन्दार्थनिरूपणे ॥२७॥

आगमान्योन्यविश्लेषे हेयोपादेयसंशये ।
ऊहयित्वा स्वचित्तेन न्याययुकत्यनुसारिणा ॥२८॥

इदं ग्राह्यमिदं नेति छेत्तुं तर्क्को विधियते ।
काष्ठलोष्ठसुवर्णेषु मित्रोदासीन शत्रुषु ॥२९॥

स्नेहः सर्वेषु तुल्यत्वं समाधिरिति संज्ञितः ।
ज्ञानं मौनं ब्रह्मचर्यं दुर्व्वासेन्द्रियनिग्रहः ॥३०॥

क्रियाऽ प्रादुर्भावनञ्च षडुपायाः प्रकीर्त्तिताः ।
वेदोपवेदवेदाङ्गे लौकिकं ज्ञानमुच्यते ॥३१॥

तत्त्वसिद्धान्तयोगस्तु लोकोत्तरमिति स्मृतम् ।
मिथ्या पिशुनसम्भिन्नपारुष्यवचनापन च ॥३२॥

जल्पतः सम्भवन्त्येते तस्मान्मौनं प्रशस्यते ।
अगम्यनारीसंसर्ग्गात् परदारानिषेवणत् ॥३३॥

सिद्धिर्न जायते योगः समुत्पन्नश्च नश्यति ।
तस्मात् तत्परिहारार्थे व्रतमेतदुदाहृतं ॥३४॥

ब्रह्मचारी तदा भूत्वा स्थातव्यं सिद्धिमिच्छता ।
राग उत्पद्यते पुंसां शोभनेन तु वाससा ॥३५॥

काषायं कुत्सितं वापि तददा वासः समिष्यते ।
इन्दियाणि शरीर स्थाः शत्रवो नित्यबाधकाः ॥३६॥

तस्मात् तानि बिजित्यादौ पश्चाद्योगं समाचरेत् ।
अप्रकाशेन कर्त्तव्या यस्माद् यागक्रियाः सदा ॥३७॥

अप्रादुर्भाव इष्यन्ते तस्माद् योगक्रियास्तथा ।
उत्साहो निश्चयो धैर्य्य सन्तोषस्तत्त्वदर्शनं ॥३८॥

क्रतुनाञ्चोपसंहारः षट्साधनमिति स्मेतं ।
योगाभ्यासेषु या श्रद्धा, उत्साह इति भण्यते ॥३९॥

अवश्यं साधयामिति वृत्त्युत्पादः स निश्चयः ।
सिद्ध्यसिद्ध्योर्मनोवृत्तिर्तुल्यता धैर्य्यमुच्यते ॥४०॥

यथालब्धान्नवस्त्रेषु प्रीतिः सन्ता प्रीतिः सन्तोष उच्यते ।
आत्मतत्त्वं जयम्प्रोक्तं विद्या तत्त्वं तथा त्विदं ॥४१॥

शिवतत्त्वं नमस्कारैस्तत्त्वत्रयमुदाहृतं ।
तत्त्वंमेकं समभ्यस्य सर्व्वविज्ञानमात्रकं ॥४२॥

ग्राह्यत्वाग्राह्यसंविद्यांकार भेदैस्त्रिधा इति ।
पञ्च भूतान्यहङ्कारः सूक्ष्म आत्मा महांस्तथा ॥४३॥

एकादशेन्द्रियगणः पञ्च तन्मात्रगोचराः ।
पञ्चविंशतितत्त्वानि प्रोक्तान्येतानि पण्डितैः ॥४४॥

तेषां गुणविभागज्ञा विज्ञेया योगिनः सदा ।
याज्ञिकैर्व्विहिता धर्म्मा भौगैश्वर्य्यधनांवहाः ॥४५॥

स्वर्ग्गमात्रपरा धर्म्मा न तु संसार मोचकाः ।
भौगैश्वर्य्य प्रसक्तानां योगसिद्धिर्न जायते ॥४६॥

तदादि तस्माद्यज्ञानामुपसंहार इष्यते ।
वेला निद्राऽऽसनंस्थानं चत्वारो नियमाः स्मृताः ॥४७॥

मूत्राविष्ठासमुत्सर्गे भोजने चैव योगवित् ।
वेलामेतावती त्यक्त्वा शषं युञ्जीत तत्परः ॥४८॥

अन्धवज्जडवच्चैवोन्मत्तवन्मूकवत्तथा ।
एवं भूत्वा सदा योगी ध्यानासक्तो महीं चरेत् ॥४९॥

पूर्वयामश्चतुयश्च द्वावेतौ न स्वपेन्निशि ।
मध्ययममद्वयं योगी निद्रां सेवेत सर्व्वद ॥५०॥

षड्रसोपेतसुस्निग्धस्वादुसान्द्रसुगन्धिना ।
उदरस्यार्द्धभागन्तु भोजनेन प्रपुरयेत् ॥५१॥

पानीयेन चतुर्भागं तच्छेषं शून्यमिष्यते ।
वायोस्सञ्चारणार्थमाहारनियमः स्मृतः ॥५२॥

वल्मीकसन्निकृष्टाग्निशुष्कवृक्षजलाश्रयम् ।
दंशादिकीटकाकीर्णं स्थानमेतद् विवर्जयेत् ॥५३॥

विविक्ते निर्जने शान्तेवृक्षमूले शिवालये ।
नदी तीरे गृहे वापि योगं युञ्जीत यत्नतः ॥५४॥

मानसो यौगपद्यश्च द्विरूपो योग उच्यते ।
अकृत्वा प्राणसंरोधं मंनसैकेन केवलं ॥५५॥

ध्यायेत परमं सूक्ष्मं स योगो मानसः स्मृतः ।
संयम्य मनसा प्राणं प्राणायामैर्मनस्तथा ॥५६॥

एवं ध्यायेत् परं सूक्ष्मं यौगपद्यः स उच्यते ।
संक्षिप्ता प्रथमा ज्ञेया विशाला समनन्तरं ॥५७॥

ततो द्विकरणी चेति त्रिविधो योग उच्यते ।
ब्रह्मादिस्तम्बपर्यन्तं सर्व्वे स्थावरजङ्गमाः ॥५८॥

स्वर्गा पातालमर्त्येषु यथास्थिति व्यवस्थिताः ।
चिन्तयित्वा पुनः सर्व्वान् संक्षिप्य परमात्मनि ।५९॥

प्रलिनमनसा ध्यायेत् क्रमाच्छून्यं भवेज्जगत् ।
तदा विशिष्यते शुद्धः स्व एकः परमाक्षरः ॥६०॥

एष योगविधिः प्रोक्तः संक्षिप्तो नाम नामतः ।
सुसूक्ष्मं चिन्तयित्वादौ परमात्मानवमव्ययं ॥६१॥

तस्य तेजसि निर्ञ्जातां शक्तिं योगाद् विचिन्तयेद् ।
सदाशिवादीस्तान् सर्व्वान् परिपाट्या भवे स्थितान् ॥६२॥

पश्चात् कृत्स्नं जगद् ध्यायेद् बिशाला परिकीर्त्तिता ।
एषा द्विकरणी नाम योगस्य विधिरिष्यते ॥
क्षुन्निद्राऽऽलस्यमैश्वर्य्यं भोगः स्नेहो धनं यशः ॥६४॥

धर्म्मो विद्या च विज्ञेया उपसर्ग्गगणा दश ।
अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ॥६५॥

ईशित्वञ्च वशित्वञ्च यत्र –कामावसायिता ।
इतयैश्वर्य्यगुणा अष्टौ पुरा प्रोक्ता मनीषिभिः ॥६६॥

गुणैरमीभिः संयुक्तो भवेद् योगी न संशयः ।
यस्य प्रभावात् सूक्ष्मत्वं यायाद् योगी यथेच्छया ॥६७॥

दृष्टेरगोचरं यावत् सगुणो भव्यतेऽणिमा ।

गुणेन महता येन निर्द्दग्धदुरितो लघु ॥६८॥

यायाद् विहायसा योगी स गुणो लघिमा स्मृतः ।
यद्यथोक्तः क्षरेद् द्रव्यं तत्तच्चिन्तामणेरिव ॥६९॥

योगिना प्राप्यते यस्मात् स गुणः प्राप्तिरुच्यते ।
अनेकदेहमात्मानं कुरूपं वा मनोरमं ॥७०॥

ऋद्ध्या करोति यद् योगी तत् प्राकाम्यमुदीर्य्यते ।
गुणेन येन सम्पन्नो देवासुरनरादिभीः ॥७१॥

सर्व्वत्र पूज्यते योगी स गुणो महिमा मतः ।
योगी सर्व्वानबष्टभ्य करोत्यज्ञानवन्ध्यताम् ॥७२॥

प्रभुत्वं न्यायवत् सौख्यं तदीशित्वमुदीर्यते ।
यत् सेव्यते सर्व्वसत्त्वैः सौभाग्यगुणमोहितैः ॥७३॥

योगी भृत्यैरिव स्वामी वशित्वं तद्भिधीयते ।
यत्र यत्र भवेद् प्रीतिस्तत्र गत्वावसीदति ॥७४॥

मनोजवेन सा ख्याता यत्र–कामावसायितेति ॥७५॥

**इति धर्मपुत्रिकायां संहितायां साधन प्रकरणन्नाम प्रथमः पटलः ॥१॥**

=====================ॐ====================

# अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां आसनप्रकरणंन्नाम

## द्वितीयः पटलः

### ॐ नमः शिवाय

अष्टाभिः साधनै रेभिश्चित्तं कायं च यत्नतः ।
शोधियित्वा ततो योगी योगाभ्यासं समाचरेत् ॥७६॥

इष्टदेवं नमस्कृत्य सद्गुरुञ्च प्रयत्नतः
आस्थीयात् प्राङ्मुखो भूत्वा शुचिर्योगी विशेषतः ॥७७॥

पद्मस्वस्तिकपीठानि स्थलमञ्जलिकासनं ।
अर्द्धचन्द्रञ्च दण्डञ्च सर्व्वतोभद्रमेव च ॥७८॥

एवं नामभिरष्टाभिरासनप्रकरणं स्मृतं ।
तेषां संस्थानभेदन्तु प्रवक्ष्यामि यथाक्रमं ॥७९॥

आस्थित्योत्तान पादाग्रौ ग्रन्थिवच्चेतरेतरौ ।
ऊर्व्वोरूपरि विन्यस्य श्लिष्पार्ष्णी सुसंस्थितौ॥८०॥

उत्तानं वामहस्ताग्रं पार्ष्ण्योरुपरि विन्यसेत् ।
तस्योपरि पुनस्तद्वत् स्थाप्य दक्षिणपल्लवं ॥८१॥

अवक्रस्तब्धनिस्पन्दगात्र शैलावलम्बितं ।
बाहुयुग्मं तथा कार्य्यं यथा मृदुलताद्वयं ॥८२॥

समुद्भवदथोष्ठाभ्यामागाढपिहितं मुखं ।
दन्ताग्रे न्यस्य जिह्वाग्रं स्थिरं ग्रीवा च मस्तकं ॥८३॥

नासाग्रं मात्रं दृष्ट्यर्द्धं निमीलल्लानेचद्वयं ।
पद्मासनमिति ज्ञेयं प्रशस्तं सर्व्वयोगिभिः ॥८४॥

संस्थायौ भूतले पादावासनस्थेनयोगिना ।
दक्षिणं वामभागे तु वामपाद्न्तु दक्षिणे ॥८५॥

अन्योन्याभिमुखं धृत्वामृगशिर्षकरद्वयं ।
पूवोर्क्तनैव गात्रेण स्वस्तिकसनसंज्ञितं ॥८६॥

आसनस्थेन पादौ द्वौ न्यसनाद् भूतले समं ।
जानुद्वयोर्हस्ततले थि(कृ)त्वा पिठासनं भवेत् ॥८७॥

अस्मिन्नेवासने भावे भुवि स्थित्वा प्रयोजन ।
बाहुरुजङ्घासुश्लिष्टं स्थलासनमुदीरितं ॥८८॥

भूवि स्थित्वा तु जानुभ्यां सर्व्वगात्रेण योगिना ।
हृदि हस्तंपुटं कार्य्य ज्ञेयमञ्जलिकासनं ॥८९॥

तलपादेन वामेन जानुना दक्षिणेन च ।
स्थित्वा हस्तपुटं कार्य्यमर्धचन्द्रासनं विदुः ॥९०॥

अग्रे प्रसारितौ पादौं सुश्लिष्टौ भूमिसंस्थितौ ।
उपविश्वयार्द्धकायन्ते दण्डासनमिति स्मृतं ॥९१॥

समपादलब्धभूमि रत्नजानुकलम्बितं ।
सम्बद्धमसम्बद्धंवा सर्व्वतोभद्रमासनं ॥९२॥

**इति धर्मपुत्रिकायां संहितायांसाधनप्रकरणन्नाम द्वितीयः पटलः ॥२॥**

====================ॐ===================

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकायासंहितायां धारणावंशप्रकरणंन्नाम

## तृतीयः पटलः

**ॐ नमः शिवाय**

उपविश्य ततौ योगी यथोक्तनासनेन तु ।
योगस्य धारणवंशे पर्व्वाणि च निरूपयेत् ॥९३॥

अङ्गुष्ठ प्रथमं पर्व्व द्वितीयं पादमेव च ।
पार्ष्णिः तृतीयकं पर्व्व चतुर्थं गुल्फमुच्यते ॥९४॥

जङ्घा पञ्चमपर्व्वाहुः षष्ठं जानु विधीयते ।
ऊरु सप्तममित्युक्तमष्टमं पायुसंस्थितमं ॥९५॥

उपस्थो नवमं पर्व्वं दशमं नाभिकीर्तितं ।
मन्स्त्वमेकादशं पर्व्वं, उरो द्वादशमुच्यते ॥९६॥

त्रयोदशं कण्ठ उक्तं जिह्वा पर्व्वं चतुर्द्दशं ।
नासिका पञ्चदशकं चक्षुः षोडशमीरितं ॥९७॥

ललाटं सप्तदशकं मूर्ध्न्यष्टादशकं स्मृतं ।
उपारिष्टादूनविंशमर्च्चिर्विंशतिमन्तथा ॥९८॥

परदेशमेक विंशं द्वीपान्तरमतः परं ।
पातालन्तु त्रयोविंश भूस्वर्ग्गस्तदनन्तरं ॥९९॥

पञ्चविंशतिमं व्योम स्वर्ग्गलोकमतः परं ।
सप्तविंशं सोमलोकं ब्रह्मलोकं तथान्तिमं ॥१००॥

अष्टाविंशतिपर्व्वाणि कीर्त्तितानिमनीषिभिः ।
योगधारणवत्  सर्व्वं स्मृतं प्रकरणानिवतं ॥१०१॥

अष्टाविंशतिपर्व्वाणि सम्यम् ज्ञात्वा विचक्षणः ।
तेषु पर्व्वसु सर्व्वेषु, एकैकस्मिन् क्रमेण तु ॥१०२॥

तत्र स्थितं जीव भूतमात्मानं विन्दुसंज्ञितं ।
प्राणान् यस्मिन् निरुध्येत तत्र विन्दुं विचिन्तियेत् ॥१०३॥

**इति धर्मपुत्रिकायां धारणावंशप्रकरणन्नाम तृतीयः पटलः ॥३॥**

====================ॐ================

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां ध्यानमार्ग्गप्रकरणंन्नाम

## चतुर्थः पटलः

### ॐ नमः शिवाय

पञ्चध्येयः पञ्चजपः पञ्चकर्म्म फलप्रदः ।
एवमष्टादशविधो ध्यानमार्ग्गः सलक्षणः ॥१०४॥

योगक्रमसमारम्भे जपाभ्यासे च बुद्धिमान् ।
आदौ विचिन्तयेद् योगी हृत्पद्मं धृतिकर्णिकं ॥१०५॥

अहिंसानालसंयुक्तमुत्तानं पद्मकेशरं । सत्यं तत
अस्तेयादिभिरष्टाभिः शीलपत्रैरलङ्कृतं ॥१०६॥

तन्मध्ये परमो देवो बिन्दुरित्यभिधीयते ।
जीवः स एव विज्ञेयस्तस्य भेदास्तु पञ्चधा ॥१०७॥

प्रकृतिः पुरुषश्चैव प्रभुर्विद्या शिवस्तथा ।
सूर्य्यचन्द्र हुताशार्च्चिर्स्फाटिकाम्बरसन्निभाः ॥१०८॥

प्रथमा सूर्य्यसंस्थाना कणिर्कोपरि संस्थिता ।
या चतुविशिका प्रोक्ता या च शक्तिरिति स्मृता ॥१०९॥

अविद्येति च या ख्याता संसारे सुखबुद्धिदा ।
त्रैगुण्यभावनिलया प्रकृतिः साऽभिधीयते ॥११०॥

इदं प्रकृतिजं सर्व्वं दुःखमित्यभिभावयेत् ।
उपेक्षेते विरागात्मा निर्गुणः केवलः स्थितः ॥१११॥

सूर्य्यमण्डलमध्यस्थचन्द्रमण्डलसन्निभः ।
पञ्चविंशतिमः प्रोक्तः पुरुषः सोऽभिधीयते ॥११२॥

कीदृक् किमिति वा ज्ञानमिति सम्यङ् निरूपयेत ।
मोक्षविज्ञानभावो यः स षड्विंशकमण्डलं ॥११३॥

चन्द्रमण्डलमध्यस्थो वन्हिज्वालानिभाकृतिः ।
अविद्यादावदग्धोऽसौ प्रभुरित्यभिधीयते ॥११४॥

सर्व्वतृष्णाविनिम्मुक्तः समः सर्व्वेषु सर्व्वदा ।
कृतकृत्यतया यस्तु ज्ञानमात्रैक केवलः ॥११५॥

अत्यन्तनिर्म्मलः स्वच्टः शुद्धस्फटिकसन्निभः ।

अग्निमण्डलमध्यस्थः सप्तविंशक उच्यते ॥११६॥

अकीर्त्तितमनौमप्यं पञ्चमं शिवमण्डलं ।
विद्यामण्डलमध्यस्थमष्टाविंशकमुच्यते ॥११७॥

धार्य्यते यत्र निश्वासस्तत्रं विन्दुं विचिन्तयेत ।
यो देशः पूर्य्यते प्राणैर्जीवस्तं याति नान्यथा ॥११८॥

प्राणोऽपानः समानश्च, उदानो व्यान एव च ।
पञ्चैते वायवः सन्ति तेषां पञ्चविधो जयः ॥११९॥

प्राणायामं प्रकुर्व्वि पूरकादिचतुर्व्विधं ।
पृथक पृथक् परिच्छिद्य परिपाट्या यथाक्रमं ॥१२०॥

निरोधाद्देहमनसोर्य्यावत् स्वेदो न जायते ।
निःश्वासं धारयेत् तावत् पूर्व्वाभ्यासविशेषतः ॥१२१॥

क्रमेण धारणावेलां स्तोकं स्तोकं विवर्द्धयेत् ।
पश्चान्मात्रादियोगान्तं परिमाणन्तु धारयेत् ॥१२२॥

एवमभ्यासयोगेन प्राणो वायुर्व्विजीयते ।
जितस्य लक्ष्मणं योगी स्वदेहे पश्यति स्वयं ॥१२३॥

परिश्रान्तेऽपि निःश्वासो यदा वाढं न वर्त्तते ।
चिरात् प्रवर्त्तते वायु स्थितो वा नासिकापुटे ॥१२४॥

तदा योगी विजानियात् प्राणो वायुर्ज्जितो मया ।
इति प्राणजयः प्रोक्तो योगशास्त्रविशारदैः ॥१२५॥

पूर्व्ववत् पूरणं कृत्वा धार्य्यमाणं समीरणं ।
अधोभागं तदा योगी मनसा प्रेरयेच्छनैः ॥१२६॥

ततः स्वयं विमुच्येते अपानो जीयहते क्रमात् ।
जितस्य लक्षणाञ्चास्य दाषो नापि प्रवर्त्तते ॥१२७॥

वतमुत्रपुरीषाणां निरोधेषु कदाचन ।
स्वेच्छोत्सर्ग्गक्षमो योगी भवर्त्येव न संशयः ॥१२८॥

अत्यभ्यासात् प्रणश्यन्ति कदाचिद् योगिनस्तदा ।
भगन्दरादयो रोगा इत्यपानजयः स्मृतः ॥१२९॥

पूर्व्ववत् कुम्भकेनैव रुद्ध्वा वायोर्ग्गतागतं ।
न पूरयेन्न रेचयेदेवं व्यानो विजीयते ॥१३०॥

जितस्य लक्षणञ्चास्य शिथिलं स्निग्धगात्रता ।

अनन्ताशी निरुद्वेगी सर्व्वक्लेशसहो भवेत् ॥१३१॥

स्नायुत्वगुपघातादि कदाचिज्जायते नहि ।
अत्याभ्यासस्य संयोगादेष व्यानजयः स्मृतः ॥१३२॥

तेषां मध्ये प्राधानस्य निर्द्दोषस्य विशेषतः ।
प्राणस्यैव जयाभ्यासं प्रशसन्ति मनीषिणः ॥१३३॥

यदा तु प्राणमेवैकं योगी सम्यग् विजेष्यति ।
तदा सर्व्वे जिता एव भवन्त्येते ऽपि वायवः ॥१३४॥

किन्तु कर्म्मविभागार्थं मरुतान्देहवर्त्तिनां ।
जयः पञ्चविधः प्रोक्तो योगिभिस्तत्त्वदर्शिभिः ॥१३५॥

एवं वायु विनिर्ज्जित्य पश्चात् कर्म्म समारभेत् ।
अजितैस्तु कृतं कर्म्म दोषः समुपजायते ॥१३६॥

नाडी शोधनमेवैकं कार्य्यनाडीद्वितीयकं ।
तृतीये धारणावंशं योजनं नाम नामतः ॥१३७॥

उद्रेचनी चतुर्थन्तु प्रलयोत्क्रान्तिपञ्चमं
एतानि पञ्च कर्म्माणि कीर्त्तितानि मनीषिभिः ॥१३८॥

जितेन शोधयेन्नाडीः प्राणेनैकेन वायुना ।
अथवा मध्यभागन्तु समानेन विचक्षणः ॥१३९॥

पादाङ्गुष्ठतलं यावादपानाख्येन वायुना ।
ऊर्ध्वभागमुदानेन त्रिभिरेवं विशाधयेत् ॥१४०॥

अथवा साधनोपायः प्रकारान्तरमुच्यते ।
अङ्गुलाग्रेण संरुध्य दक्षिणं नासिकापुटं ॥१४१॥

वामेनाकृष्य पवनं देहमापुर्य्य धारयेत् ।
ततो विरचयेत् सर्व्वं दृतिवद्दक्षिणेन तु ॥१४२॥

तथैव विपरीतञ्च कुर्य्याद् योग पुनः पुनः ।
नाडी शोधन नामैनं प्रथमं कर्म्म कीर्त्तितं ॥१४३॥

ॐ इतयेकाक्षरं सम्यक् समुच्चार्य्य विचक्षणः ।
हठादाकर्षयेत् प्राणानधोभागे व्यवस्थितान् ॥१४४॥

सर्व्वन् संहृत्य हृदये वर्त्तुलीकृत्य धारयेत् ।
ॐकारं पुनरुच्चार्य्य कपालान्तमुदीरयेत् ॥१४५॥

मूर्ध्निक्षणं धारयित्वा प्रतीपमपकर्षयेत् ।

ततस्तेनैव मार्ग्गेण हृदये स्थापयेन् मुहुः ॥१४६॥

ततो विनिश्वसेद्योगी नासिकाभ्यां शनैः शनैः ।
इदं कर्म्म द्वितीयं स्यात् काय्यनाडीतिसंज्ञितं ॥१४७॥

नाडीसञ्चारमार्ग्गेषु पादाङ्गुष्ठादिपर्व्वसु ।
ॐ कारेण समुत्कर्षन्नेकैकस्मिन् पृथक् पृथक् ॥१४८॥

ध्यात्वा ध्यात्वा विधार्य्यैव परिपाट्या यथाक्रमं ।
शाखास्ववस्थितान् सर्व्वान् संक्षिप्य स्थापयेद्धृदि ॥१४९॥

तथैव पुनरुद्धृत्य प्राणानुरसि धारयेत् ।
ततः कण्ठे च जिह्वायां नासिकायां तु चक्षुसि ॥१५०॥

ललाटे मस्तकं यावदुत्क्षियोत्क्षिप्य धारयेत् ।
एवमेव क्रमाद् वायुं प्रतिपमपकर्षयेत् ॥१५१॥

ततः प्राणं हृदिस्थाप्य शनैर्योगी विनिश्वसेत् ।
तृतीयं कर्म्म निर्दिष्टं धारणावंशयोजनं ॥१५२॥

एवं प्रतिदिनाभ्यासैर्न्नाडी कार्य्यक्षमा भवेत् ।
अथ कर्म्मान्तरं गुह्यं ततो योगी समारभेत् ॥१५३॥

इडा वामा सुषुम्णा च  नाड्यास्ता नासिकाक्षितोः ।
भ्रुवोर्मध्ये परा नाडी तज्ज्ञैस्तुर्य्येस्ति कीर्त्तिता ॥१५४॥

ताभ्यां विनिर्गत प्राणो भवबन्धन मुच्यते ।
तुर्यया यस्तु निर्यातो योगी योगफलं लभेत् ॥१५५॥

नव स्रोतासि यत्नेन निरुध्य मनसा पुनः ।
सदीर्घनादमुच्चार्य तुर्यस्थानं समाविशेत् ॥१५६॥

यावन्नासादयेद् योगी योगमार्ग स्वमस्तके ।
तावत् सम्यक् प्रकुर्व्वीत द्वित्रिवारं दिने दिने ॥१५७॥

बहुवारं न कुर्व्वीत क्रमयोगेन साधयेत् ।
हठसाध्यं न कर्तव्यमखेदेनैष साधयेत् ॥१५८॥

अभ्यासेन यथा लक्ष्यं धानुष्को भेदयेत् शरैः ।
तथैवान्वेषयेत् प्राणैर्म्मार्गं योगी स्वमस्तके ॥१५९॥

आसादयेद् यदा योगी तुर्य्यस्थानं विचक्षणं ।
प्राणं प्रतीपमाकृष्य हृदये धारयेत् पुनः ॥१६०॥

तन्मार्ग्गेणा विनिःसृत्य क्षणं स्थित्वा निर्क्तयेत् ।

उपरिष्टात् ततो योगी स्तोकं स्तोकं क्रमेण तु ॥१६१॥

अर्च्चिर्धूमशिखां यावद् गत्वा गत्वा निवर्त्तत्ते ।
उद्रेचनीति विख्याता चतुर्थ कर्म्म कीर्त्तित ॥१६२॥

एतां सततमभ्यस्य योगी कालमपेक्षणात् ।
अरिष्टन्तु स्वदेहे तु नित्यमेव निरूपयेत् ॥१६३॥

अरिष्टन्तु यदा पश्येन्मृत्युरूपं सुदारुणं ।
तदा देहपरित्यागं कर्त्तुं कर्म्म समारभेत् ॥१६४॥

नागाख्यः कृकरः कूर्म्मो देवदत्तो धनञ्जयः ।
विकुर्व्वते मुमूर्षुणां पञ्चैते वामवोऽपरे ॥१६५॥

आसन्नमृत्युर्म्मनुजो गाढं निश्वसते यदा ।
एतन्नागाभिधानस्य वायोर्ल्लिङ्गमुदाहृतं ॥१६६॥

ततो मर्म्माणि सञ्छिद्य पर्व्व यथाक्रम ।
यदा सन्त्यज्यते प्राणैर्व्विकारः कृकलस्य सः॥१६७॥

शाखास्ववस्थितान् सर्व्वान्संहृत्य हृदये यदा ।
वर्त्तते चोत्तरादूर्ध्वमेतत् कूर्म्मस्य लक्षणं ॥१६८॥

ततो निश्चलदेहस्य कण्ठे घुरघुरायते ।
इदन्तु देवदत्तस्य वायोर्ल्लिङ्गं प्रकीर्त्तितं ॥१६९॥
यदा धनञ्जयो नाम वायुराजो विकारकः ।
तच्छरीरं परित्यज्य जीवो लोकान्तरं व्रजेत् ॥१७०॥

यद्यत्तदा चिन्तयते प्रेरित पूर्व्वकर्मणा ।
पुण्या पुण्यफलैर्य्युक्तस्तत्र तत्रोपपद्यते ॥१७१॥

अष्टात्सु परदेहादिब्रह्मलोकान्तपर्व्वसु ।
मध्ये यद्रोचते गन्तुं लक्षन्तत् परिकल्पयेत् ॥१७२॥

यदा दृष्टया धनुष्पाणिर्ल्लक्षमेकं निरीक्षयेत् ।
तथैव परदेहादीन् ध्यायेच्चित्तेन योगवित् ॥१७३॥

तदेव मनसा ध्यायेदूर्ध्वस्रोतांसि यत्नतः ।
सुदीर्घं व्याहरेन्नामविच्छिन्नानुगध्वनिं ॥१७४॥

सकृदुच्चरितेनैव यथा लक्ष्यं प्रपद्यते ।
यदा नादं समुच्चार्य शरवत् प्रेरयेदसून् ॥१७५॥

जितलक्षो हि धानुष्काः शरेणैकेन घातयेत् ।

तथैव जितयोगोऽपि नादेनैकेन यास्यति ॥१७६॥

एवं परित्यजन्देहं योगी योगफलं लभेत् ।
इदन्तु पञ्चमं कर्म्म प्रलयोत्क्रान्तिसंज्ञितं ॥१७७॥

प्रथमन्तु गुणैश्वर्य्य ततः परपुञ्जयं ।
तृतीयं मोक्षमित्युक्तमेतद्योगफलत्रयं ॥१७८॥

अणिमादिगुणाष्टानां मध्ये यं प्राप्तुमिष्यते ।
तं गुणं मनसा ध्यात्वा योगी देहं परित्यजेत् ॥१७९॥

गुणेन तेन संयुक्तो भूत्वा जायते योगवित् ।
गुणैश्वर्यमिति प्रोक्तं योगस्य प्रथमं फलं ॥१८०॥

यदा जराभिभूतत्वात् स्वदेहं त्यक्तुमिष्यते (मिच्छति) ।
अन्वेषयेत्तदा योगी कञ्चिन्मृतकलेवरं ॥१८१॥

अङ्गावयवसम्पूर्णं कुलरूपसमन्वितं ।
तद्देहं मनसा ध्यात्वा योगं कुर्व्वति पूर्व्ववत् ॥१८२॥

गर्भवांसपरि क्लेश शिशुभावविवर्ज्जितं ।
द्वितीयं फलमित्युक्त नाम्ना परपुरञ्जयः ॥१८३॥

निराश्रयेण चित्तेन ज्ञानमात्रावलम्बिना ।
न किञ्चिदपि सञ्चिन्त्य यदि देहं परित्यजेत् ॥१८४॥

स प्रयाति परं ब्रह्म सर्व्वदुःखान्तमव्ययं ।
तृतीयं फलमित्युक्तं मोक्षं नैरञ्जनं फलं ॥१८५॥

**इति धर्मपुत्रिकायां संहितायां ध्यानमार्ग्गप्रकरणन्नाम चतुर्थः पटलः ॥४॥**
======================ॐ==================

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां सूक्ष्मान्तरायोंन्नाम

## पञ्चमः पटलः

### ॐ नमः शिवाय

अथान्तरायाश्चतुर्व्विधाः ।
सूक्ष्मान्तरायो महासूक्ष्मान्तरायः
प्रमादजान्तरायः प्रातिभाद्यन्तरायश्चेति ॥१८६॥

युञ्जतो योगिनः प्राया जायन्ते विघ्न हेतवः ।

तस्माज्जयचिकित्साश्च ज्ञातव्या योगिना सदा ॥१८७॥

मित्रं लक्ष्मीर्धनं कान्ता शिष्योपाध्यायबान्धवाः ।
सूक्ष्मान्तराया इतयुक्ता देवैरपि सुदुर्ज्जयाः ॥१८८॥

निबद्धाः स्नेहपाशेन विषयास्वादतत्पराः ।
ऋषयः पितरो देवा मुह्यन्तेऽत्र सुखप्सवः ॥१८९॥

प्रपश्यन्तो महात्मानो विद्वांसो दिव्यचक्षुषाः ।
प्रसक्ताः सूक्ष्मभावेन नाप्नुवन्ति पराङ्गतिम् ॥१९०॥

तांस्तु सर्व्वांस्तदा योगी सिद्धर्थाक्षेपकारकान् ।
अन्तरायानिति ज्ञात्वा मनसा परिवर्ज्जयेत् ॥१९१॥

**इति धर्मपुत्रिकायां संहितायां सूक्ष्मान्तराया नाम पञ्चम पटलः ॥५॥**

=======================ॐ================

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां महासूक्ष्मान्तरायों नाम

## षष्ठः पटलः

### ॐ नमः शिवाय

कदाचित् पापसामर्थ्यात् तारुण्ये ह्येव देहिनां ।
आसन्नमृत्युश्चारिष्टा जायन्ते पूर्व्वकर्म्मजाः ॥१९२॥

योगसिद्धिर्भवेन्नैव मरणं चेद् भविष्यति ।
महासूक्ष्मान्तरायोऽयं कीर्त्तिस्तत्वदर्शिभिः ॥१९३॥

भयं तत्र न गृह्णीयादभ्यासञ्च न मुञ्चयेत् ।
योगिना यत् तदा युक्तं कार्य्य शीघ्रं समारभेत् ॥१९४॥

अरिष्टं द्विविधं प्रोक्तं बाह्यमध्यात्ममेव च ।
बाह्यं तावत् प्रवक्ष्यामि यदुक्तं तत्त्वदर्शिभिः ॥१९५॥

अकस्मादेव यः पश्येत् पुरुषं कृष्णपिङ्गलं ।
तस्य वर्षत्रयादूर्ध्व न भवेदायुरात्मनः ॥१९६॥

विरश्मि स्वच्छमेवैतन्मध्यान्हे सूर्य्यमण्डलं ।
यः पश्येत्तेन विज्ञेयं द्विवर्षान्मरणं भवेत् ॥१९७॥

अरुन्धतीं ध्रुवञ्चैव सोमच्छायां महापथं ।
यो न पश्येन्न जीवेत नरः संवत्सरात्परं ॥१९८॥

मध्ये चन्द्रमसं छिद्रं गन्धर्व्वनगराणि च ।
युग्मशाखाद्रुमं पश्येद्दश मासान् स जीवति ॥१९९॥

छर्द्दिमूत्रपुरीषाणि यस्य हेमरजो भवेत् ।
प्रत्यक्षमथवा स्वप्ने त्वष्टौ मासान् स जीवति ॥२००॥

रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैरलङ्कृतं ।
तैलाभ्यक्तं तथा देहं मुण्डितं रक्तवाससं ॥२०१॥

गर्द्दभारुढमात्मानं गच्छन्तं दक्षिणां दिशं ।
यः पश्येदीदृशं रूपं षण्मासं तस्य जीवितं ॥२०२॥

आरुह्य मस्तके यस्य कृकलासः प्रवेगवान् ।
धारयेत् त्रीणि वर्णानि पञ्च मासं स जीवितं ॥२०३॥

पृष्ठतो ह्यग्रतो वापि यदि खण्डं पदं भवेत् ।
कर्द्दमे पांसवे चापि चतुर्मासं सजीवति ॥२०४॥

सलोहदण्डपुरुषं कृष्णं कृष्णपरिच्छदं ।
यः पश्येत् पटर्यतः स्वप्ने मासत्रयं सः जीवति ॥२०५॥

स्नातमात्रस्य यस्यासु हृत् पादौ च विशुष्यतः ।
धूमो वा मस्तके तस्य द्वौ मासौ स तु जीवति ॥२०६॥

हंस–काक–मयूराणामेकीभूतं प्रपश्यति ।
अनभ्रे विद्युतं पश्येच्छक्रचापं ततो निशि ॥२०७॥

अङ्गारं गृह्य वक्त्रेण काको वा मस्तके पतेत् ।
क्रव्यादो वा खगो वापि मासमेकं सजीवति ॥२०८॥

अप्सु वा यदि वाऽऽ दर्शे चात्मानं यो न पश्यति ।
छायां वाऽप्यशिरः पश्येदर्द्धमासं स जीवति ॥२०९॥

यस्य नेत्रे धङ्कधङ्के कर्णः स्थानाच्च भ्रश्यते ।
वक्रा नासा भवेद्यस्य सप्तरात्रं स जीवति ॥२१०॥

शवगन्धो भवेद्यस्य दन्तकर्षश्च जायते ।
छायां वा विकृतां पश्येत् त्रिरात्रं तस्य जीवितं ॥२११॥

यस्या कृष्णा खरा जिह्वा पद्मवर्णं मुखं भवेत् ।
गण्डौ तु पीतकौ रक्तौ दीपगन्धं न जिघ्रति ॥२१२॥

सम्भिद्य मारुतो यस्य मर्म्मस्थानाच्च भ्रश्यते ।
ज्योतिश्चैव न पश्येद्यो दिनमेकं स जीवति ॥२१३॥

नासिका–कर्ण–दन्ताश्च चक्षुषी वापि निर्गताः ।
लुप्तसंज्ञो भवेद्यस्ते सद्यो मृत्यु स गच्छति ॥२१४॥

आध्यात्मिकं प्रवक्ष्यामि यदुक्तं तत्त्वदर्शिभिः ।
यद्यकस्यां सुषुम्णायां यदि मान्द्यं प्रवर्त्तते ॥२१५॥

दिनानि गणयित्वा तु पञ्च दिक् तिथि विंशति ।
तत्त्वान्येकाधिकं पश्चाद्वेवान्तानि मनीषिणा ॥२१६॥

ममायुरिति विज्ञेयं लोकनेत्रेन्दवः समाः ।
मासा ऋतु गुण त्वेका परिपाट्या यथाक्रमं ॥२१७॥

तिथ्याया (का) सानलोकाक्षिभूमयो दिवसास्तथा ।
इडायां श्रवणे वापि तथैवेति विनिर्द्दिशेत् ॥२१८॥

विपरितस्वभावश्च प्रोक्तमाध्यात्मिकं बुधैः ।
दृष्ट्वारिष्टं तदा योगी प्रतिकारं समारभेत् ॥२१९॥

**इति धर्मपुत्रिकायां संहितायां सूक्ष्मान्तराया नाम षष्ठः पटलः ॥६॥**
=====================ॐ===============

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां प्रमादजान्तराया नाम

## सप्तम पटलः

### ॐ नमः शिवाय

पञ्चैते वायवो देहे नानामुखविनिःसृताः ।
धारणाक्रमयोगेन कुर्य्यादूर्ध्वमुखसृतान् ॥२२०॥

गिरिं भित्त्वा यथा किञ्चिज्जलमूर्ध्वं प्रवर्त्तते ।
मूर्धानन्तु तथा भित्त्वा वायुरुर्ध्वं प्रवर्त्तते ॥२२१॥

एवं प्रवर्त्तमानेऽसौ योगाभ्यासान्महानिलः ।
शरीरं द्रुमवत् कृत्स्नमाकम्पयति योगिनः ॥२२२॥

कदाचित् प्रहरेद्देहमूष्णो भूत्वा प्रवर्त्तितः ।
अथवा शीतलो भूत्वा कदाचिदुभयात्मकः ॥२२३॥

अजितं स्थानमाश्रित्य प्रमादाद्यदि वर्त्तते ।
तदा रोगाः प्रजायन्ते शरीरे विघ्नकारकाः ॥२२४॥

वातो गुल्म उदावर्त्त ऊर्ध्व श्वास स्तथैव च ।
छर्द्यतीसारमोहाश्च क्लमोमूर्च्छा भ्रमस्तथा ॥२२५॥

शिरःशूलञ्च हृल्लासो हिक्किका जृम्भिकास्तथा ।
हृत्पार्श्वपृष्ठशूलञ्च वातरक्तस्तथैव च ॥२२६॥

तिमिरः स्वयथुः कुष्ठं ज्वरश्चापि कदाचन ।
प्रमदजा भवन्त्येते विघ्नरूपाः सुदारुणाः ॥२२७॥

**इति धर्मपुत्रिकायां संहितायां प्रमादजान्तराया नाम सप्तम पटलः ॥७॥**
======================ॐ==================

# अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां प्रातिभाद्यन्तराया नाम

## अष्टमः पटलः

### ॐ नमः शिवाय

प्रातिभः श्रावणादर्शश्चानुगन्धानिवेदनः ।
(प्रातिभश्रावणादर्शस्पर्शगन्धरसादनाः)
प्राप्तयोगस्य जायन्ते षडेते प्रातिभादयः ॥२२८॥

विद्या काव्यं तथा शिल्पं वेदवाक्यानुसारिता ।
वाग्मित्वञ्च कवित्वञ्च प्रमतिभस्य हि लक्षणं ॥२२९॥

श्रावणः शृणुयाच्छब्दं योजनानां शतादपि ।
सर्व्वशब्दविधिज्ञश्च सर्व्ववाक्यार्थतत्त्ववित् ॥२३०॥

देवदानवगन्धर्व्वानृषीश्च सपितृस्तथा ।
यक्षांश्चाप्सरसः पश्येत् तदादर्शस्य लक्षणं ॥२३१॥

दिव्याश्च पार्थिवांश्चैव अन्तरिक्षगतांस्तथा ।
स्पर्शगन्धरसान् वेत्ति तत् तेषामुपलक्षणं ॥२३२॥

तेषुं या शक्तिरुत्पन्ना तां हि बुध्वा परित्यजेत् ।
नित्यं ब्रह्मपरो युक्तः सोऽन्तरायैर्व्विमुच्यते ॥२३३॥

**इति धर्मपुत्रिकायां संहितायां प्रातिभाद्यन्तराया नाम अष्टमः पटलः ॥८॥**
======================ॐ==================

# अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां जयो नाम

## नवमः पटलः

### ॐ नमः शिवाय

एते दोषाः प्रवर्त्तन्ते अज्ञानी यस्तु युञ्जते ।
तस्माज्ज्ञानपरो भूत्वा योगं युञ्जीत यत्नतः ॥२३४॥

सूक्ष्मान्तराये युञ्जाते तत्रासक्तिं त्यजेद् वुधः ।
कुतः शरीरमुत्पन्नं कीदृग् वापि निरुपयेत् ॥२३५॥

पूर्व्वकर्म्मविपाकेन पिण्डः सङ्कल्पसम्भवः ।
मज्जास्थिस्नायुमांसासृक्सङ्घातं चर्म्मणावृत्तं ॥२३६॥

लालासिङ्घाणमस्तिष्क गूथमुत्रसमाकुलं ।
दुर्गन्धि कृमिभिः पूर्णं श्मशानावस्करैः समं ॥२३७॥

अशुचि क्षाणिकं तुच्छं निस्सारं निन्दितं बुधैः ।
जन्ममृत्युजराग्रस्तन्नानारोगसमन्वितं ॥२३८॥

शीतोष्णक्षुत्पिपासार्त्तन्दुष्पूरं दुःखदं घृणंः।
ममेदमीदृशं रूपं कान्तादीनाञ्च तादृशं ॥२३९॥

श्रियो वित्तञ्च दुस्साध्यमास्थिरं क्षयधर्म्मि च ।
तत्र को रज्यते प्राज्ञो योगाभ्यासी गुणान्वितः ॥२४०॥

मूढो वापि रतिं कुर्य्यात् दग्धो वा रागवन्हिना ।
यत्तु बाल्य (ह्य) न्धनं लक्ष्मीरीदृशं वा कलेवरम् ॥२४१॥

इदं षट्कौशिकं पिण्डं बहिरात्मेति भण्यते ।
एतद् विकल्पयेद्यस्तु सोऽन्तरात्मा विधीयते ॥२४२॥

स एव योगान्निःसंङ्गः सर्व्वदोषैर्व्विवर्ज्जितः ।
विकल्परहितः शुद्धः परमात्मा प्रकीर्त्तितः ॥२४३॥

य एवं भावयेन्नित्यं सोऽन्तरायान् विजेष्यति ।
तस्माद् विवर्ज्जयेत् सङ्गं ज्ञानमेकं समाश्रयेत् ॥२४४॥

महासूक्ष्मान्तराये हि समुत्पन्ने महाभयं ।
प्रतिकारं प्रवक्ष्यामि यथा श्रेयांस्यवाप्नुयात् ॥२४५॥

ध्यात्वा हृत्पद्मध्यस्थं विन्दुदेवं स्वजीवितं ।

तस्योपरि सुधाधारामव्यवच्छिन्नसन्ततिं ॥२४६॥

पतन्ती घण्टिकादेशे स्रवमानां विचिन्तयेत् ।
तेनामृतरसेनात्मतृप्तिंमुत्पादयेद् बुधः ॥२४७॥

जपेन्मृत्यञ्जयं मंन्त्रं दशलक्षं दशाक्षरं ।
नेत्रबीजेन मन्त्रेण त्र्यक्षरेण समन्वितं ॥२४८॥

अथवा सम्पुटं कृत्वा नवतत्त्वेषु योगवित् ।
एकाशीतिपदं योगं कुर्य्यादेकाग्रबुद्धिना ॥२४९॥

रसायनोपयोगञ्च यूने सर्वस्वमेव च ।
आम्रपल्लवदूर्व्वा चैर्ल्लक्षहोमञ्च कारयेत् ॥२५०॥

भयन्तत्र न गृह्णीयात् प्रीतिं वापि तथैव च ।
योगाभ्यासं तदा योगी यथा शक्ति विवर्द्धयेत् ॥२५१॥

अन्तरायेषु जातेषु नित्याभ्यासो जयः स्मृतः ।
अप्रमादी सदा योगी नदोषं प्राप्नुयात् क्वचित् ॥२५२॥

**इति धर्मपुत्रिकायां संहितायां जयो नाम नवमः पटलः ॥९॥**
=====================ॐ=========

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां चिकित्सा नाम

## दशमः पटलः

### ॐ नमः शिवाय

प्रमादी युञ्जते यस्तु वातादिस्तस्य जायते ।
तद्दोषस्य चिकित्सार्थङ्गतिं वायोर्न्निरूपयेत् ॥२५३॥

वायोरुर्ध्वप्रवृत्तस्य गतिं ज्ञात्वा प्रयत्नतः ।
कुर्य्याच्चिकित्सा दोषस्य द्रुतं योगी विचक्षणः ॥२५४॥

तलपादानाभिदेशं वातस्थानमुदिरितं ।
आनाभेर्हृदयंह्यावत् पित्तकोष्ठं प्रकीर्त्तितं ॥२५५॥

हृद्देशादूर्ध्वकोष्ठन्तु श्लेश्मालयमथोच्यते ।
इति त्रयाणां धातूनां स्वं स्वं स्थानमुदाहृतं ॥२५६॥

प्रमादाद् योगिना वायुरुन्मार्गेण प्रवर्त्तितः ।
यदा मार्गमनासाद्य ग्रन्थिर्भूत्वावतिष्ठते ॥२५७॥

तदा नानाविद्या रोगा जायन्ते विघ्नकारका: ।
तेषां चिकित्सां वक्ष्यामि यदुक्तं तत्त्वदर्शिभि: ॥२५८॥

उन्मार्ग्गं प्रस्थितो वायु: पित्तकोष्ठे यदा स्थित: ।
हृच्छूलं पार्श्वशूलं वा पृष्ठशूलञ्च जायते ॥२५९॥

तैलाभ्यङ्गं तदा पथ्य स्नानं चोष्णेन वारिणा ।
सघृतं पायसं भुक्त्वा जीर्णायुर्योगमारभेत् ॥२६०॥

यस्मिन् यस्मिन् समुद्देशे रुजा बाधा प्रवर्त्तते ।
तस्मिन देशे स्थितं वायुं मनसा परिचिन्तयेत् ॥२६१॥

एकचित्तेन तं ध्यात्वा पूरयेत् पूरकेण तु ।
निश्शेषं रेचकं कुर्य्याद् यथाशक्ति प्रयत्नत: ॥२६२॥

बहुधा रेचकं कृत्वा पूरयित्वा पुन: पुन: ।
कर्षयेत् प्रोत्थितं वायुं कर्णतोयमिवाम्बुना ॥२६३॥

सप्राणं स्निग्धमाहारं तदा भुञ्जीत योगवित् ।
एवं शूलादयो रोगा: शाम्यन्ते वात पित्तजा: ॥२६४॥

कफकोष्ठे यदा वायुर्ग्रन्थिर्भूत्वावतिष्ठते ।
हल्लासहिक्किकाश्वासशिर: शूलादयो रुजा: ॥२६५॥

जायन्ते धातुवैषम्मात् तदा कुर्य्याद् प्रतिक्रियां ।
सम्यग्भोजनमादायाप: स्पृश्य तदन्तरं ॥२६६॥

कुम्भकं धारणं कुर्य्याद् द्वित्रिवारं विचक्षण: ।
एवं श्वासादयो रोगा: शाम्यन्ते कफवातजा: ॥२६७॥

भुक्त्वा तु पायसं सोष्णं क्षीरं वापि घृतप्लुतं ।
वारुणीं धारणां ध्यात्वा कुर्य्यात् सर्व्वाङ्गपाचितं ॥२६८॥

एवं कुष्ठादयो रोगा: प्रणश्यन्ति न संशय: ।
नेत्रे सम्मील्य कुर्व्वीत तिमिरादि प्रशाम्यति ॥२६९॥

स्वयथुर्व्वातरक्तं वा योगिनो जायते तदा ।
यत्र यत्र रुजा बाधा तत्र वायुं विचिन्तयेत् ॥२७०॥

पूरयित्वा तत: सम्यग् रेचयित्वा विचक्षण: ।
धारयित्वा यथाशक्ति नाडीयोगेन निश्चलं ॥२७१॥

सङ्कुर्य्यात् कर्षयेद् भूय: कूर्म्मवद्रेचकेन तु ।
चक्रवद् भ्रामयेद् वापि पूरयित्वा पुन: पुन: ॥२७२॥

उत्तानोऽथ समे देशे ततः कृत्वा तु विग्रहं ।
प्रणायामं प्रकुर्व्वीत सर्व्वदोषप्रशान्तये ॥२७३॥

वैद्यशास्त्रोक्तविधिना क्रियां कुर्व्वीत यत्नतः ।
कुर्य्याद्योगचिकित्सां च शीघ्रमेव प्रशाम्यति ॥२७४॥

संक्षेपतश्चिकित्सांन्तु सर्व्वरोगेषु योगवित् ।
यत्र यत्र रुजा वाधा तं देशं वाप्य धारयेत् ॥२७५॥

प्रातिभाद्यन्तरायेषु समुत्पन्नेषु योगवित् ।
यथाशक्ति प्रयत्नेन योगाभ्यासं विवर्द्धयेत् ॥२७६॥

**इति धर्मपुत्रिकायां संहितायां चिकित्सा नाम दशमः पटलः ॥१०॥**
=====================ॐ==============

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां चललिङ्गो नाम

## एकादशः पटलः

### ॐ नमः शिवाय

ताभ्यां विजयते योगी यदा विघ्नचतुष्टयं ।
तदा सञ्जायते देहे प्रवृत्तिः सिद्धिसूचिका ॥२७७॥

युञ्जन् योगी यदा स्पर्शमपूर्व्व लभते स्वयं ।
स्वीकीय देहे कस्मिंश्चित्तदा तमुपलक्षयेत् ॥२७८॥

पिपीलिकागतिस्पर्शो जिह्वास्यन्दितमेष वा ।
विषाग्निकण्टकैस्तुल्यमन्यच्च सुखलक्षणं ॥२७९॥

योगाग्निन्तं विजानीयाज् ज्ञानं पापप्रणाशनी ।
प्रवृत्तिः सैव विख्याता योगसंसिद्धिसूचिका ॥२८०॥

नानाशब्दरसस्पर्शरूपगन्धा अमानुषाः ।
युञ्जता योगिना साक्षात् प्रायेणैवोपलक्षिताः ॥२८१॥

प्रवृतौ वर्द्धमानायामकाण्डे योगिन स्तदा ।
मनोज्ञः श्रुयते शब्दो देवदुन्दुभिनिस्वतः ॥२८२॥

किमप्यास्वाद्यते वक्त्रे रसश्चैवामृतोपमः ।
गात्रस्याल्हादनकरः सुखस्पर्शोऽनुभूयते ॥२८३॥

अव्यक्तरूपमाकाशे दृश्यते मेघवेष्ठितं ।
पारिजातादिपुष्पाणां गन्धो वा जायते तदा ॥२८४॥

आसां योगप्रवृत्तीनां यदि कापि प्रवर्त्तते ।
प्रवृत्तयोगं तं प्राहुर्योगिनो योगचिन्तकाः ॥२८५॥

पञ्च प्रत्यय लिङ्गानि क्षीणदोषस्य योगिन : ।
एतानि तु चलानीति कीर्त्तितानि मनीषिभिः ॥२८६॥

**इति धर्मपुत्रिकायां संहितायां चललिङ्गो नामैकादशः पटलः ॥११॥**
=====================ॐ==============

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां ध्रुवलिङ्गो नाम

### द्वादशः पटलः

#### ॐ नमः शिवाय

आत्मानं पृथिवीं वापि ज्वलन्तं यदि पश्यति ।
मध्यान्हे शशिनो विम्वं ताराारूपाणि वा दिवा ॥२८७॥

भूतान्याधिसमानानि स्वदेहे पश्यतेऽथवा ।
कीर्त्तितानि ध्रुवाणीति लिङ्गान्येतानि योगिभिः ॥२८८॥

**इति धर्मपुत्रिकायां संहितायां ध्रुवलिङ्गो नाम द्वादशः पटलः ॥१२॥**
=====================ॐ==============

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां वृद्ध्युपायो नाम

### त्रयोदशः पटलः

#### ॐ नमः शिवाय

कश्चिचदुत्पाद्य योगाग्निं सूक्ष्ममप्युपलक्षितं ।
योगेन सतताभ्यासादनिर्व्विण्णो विवर्द्धयेत् ॥२८९॥

धुम्रपूर्व्वो यथा ह्यग्निर्म्मथ्यमानः प्रजायते ।
योगाग्निर्योगिनस्तद्वत् स्पर्शपूर्व्वः प्रजायते ॥२९०॥

जनयित्वा यथा ह्यग्निः सूक्ष्मो यत्नेन दीप्यते ।

उत्पाद्य योगी योगाग्निं तथा दीप्तं विवर्द्धयेत् ॥२९१॥

तृणकाष्ठेन्धनैः सोऽग्निर्य्यथा दीप्तो विवर्द्धते ।
षडङ्गादीन्धनैस्तद्वद् योगाग्निरपि वर्द्धते ॥२९२॥

प्रदीप्तस्तु यथैवाग्निः क्षणात् क्षपयतीन्धनं ॥२९३॥

एवं योगाग्निना पापं क्षपयित्वा पुरातनं ।
पश्चात् फलं लभेद् योगी वृद्ध्युपाय इति स्मृतः ॥२९४॥

**इति धर्मपुत्रिकायां संहितायां ध्रुवलिङ्गो नाम त्रयोदशः पटलः ॥१३॥**
======================ॐ==============

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां विनाशो नाम

## चतुर्दशः पटलः

### ॐ नमः शिवाय

दृष्ट्वा प्रत्ययलिङ्गानि सिद्धिसंसूचकानि वै ।
योगिनो जायते हर्षो मनस्तुष्टिश्च वर्द्धते ॥२९५॥

अतिहर्षेण वा योगी परेभ्यः कथयेद्यदि ।
सिद्धिर्ममिति वा मत्वा योगाभ्यासं परित्यजेत् ॥२९६॥

अथवा ज्ञानदातारं गुरुं निन्दति दुर्म्मतिः ।
सा प्रवृत्तिर्व्विरूढापि त्रिभिरेतैर्व्विनस्यति ॥२९७॥

**इति धर्मपुत्रिकायां संहितायां विनाशो नाम चतुर्दशः पटलः ॥१४॥**
======================ॐ==============

## अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां प्रत्यानयनन्नाम

## पञ्चदशः पटलः

### ॐ नमः शिवाय

यदा प्रवृत्तिरुत्पन्ना वर्द्धितापि विनश्यति ।
उपायैस्त्रिभिरेवान्यैः प्रत्यानेया पुनस्तदा ॥२९८॥

नदीकूलेऽथवाऽरण्ये प्रच्छन्ने शून्यवेश्मनि ।

निःशब्दे निर्ज्जने शान्ते योगं युञ्जाद् विचक्षणः ॥२९९॥

भावयित्वा यथाशक्ति सिद्ध्युपायेषु योगवित् ।
पादाङ्गुष्ठे मनः कृत्वा शनैः प्राणान् विधारयेत् ॥३००॥

तावद् विधारयेत् प्राणान् यावत् स्पर्शो न लभ्यते ।
तत्स्यर्शं प्रेरयेदूर्ध्वं नादमुच्चार्य्य यत्नतः ॥३०१॥

अथवा दन्तयोः सन्धौ जिह्वाग्रं न्यस्य तन्मतिः ।
प्राणायामं प्रकुर्व्वीत यावात् स्पर्शो न जायते ॥३०२॥

जिह्वाग्रेण हतो योगी स्पर्शं योगी सदा लभेत् ।
तदूर्ध्व प्ररयेच्छीघ्रं तत्स्पर्शं पूर्व्ववद् बुधः ॥३०३॥

तालुमध्येऽथवा योगी मनः कृत्वा विधारयेत् ।
जातप्रवृत्तौ तत्स्पर्शं तथैव पुनरुद्धरेत् ॥३०४॥

यस्मिन् यस्मिन् शरीरेषु पूर्व जाताः प्रवृत्तयः ।
तस्मिस्तस्मिन्मनः कृत्वा योगी प्राणान् विधारयेत् ॥३०५॥

प्राणायामसमं नास्ति योगिनां पापशोधनम् ।
प्राणयामपरो भूत्वा तस्माद् युञ्जीत योगवित् ॥३०६॥

प्राणयामविशुद्धात्मा सर्व्वपापैर्व्विमुच्यते ।
तदात्मज्योतिरमलमात्मन्येव प्रपश्यति ॥३०७॥

मूर्ध्निभागे ऽथवा योगी योगादुत्कृष्य केवलं ।
मणौ सूत्रमिवासक्तं पश्यत्यात्मानमात्मना ॥३०८॥

शुद्धस्फटिकसङ्काशं विमुक्तं सर्व्वबन्धनैः ।
प्रत्यानयनमित्येतद् योगविद्भिः प्रकीर्त्तितं ॥३०९॥

**इति धर्मपुत्रिकायां संहितायां विनाशो नाम पञ्चदशः पटलः ॥१५॥**

======================ॐ==============

# अथ पशुपतिमते शिवधर्मे महाशास्त्रे धर्मपुत्रिकाया संहितायां सिद्ध्युपायो नाम

# षोडशः पटलः

### ॐ नमः शिवाय

सिद्ध्युपायं विदित्वादौ यः कर्म्म कुरुते नरः ।
तस्य हस्ततले सिद्धिर्व्वर्त्तते नात्र संशयः ॥३१०॥

स्थानासनविधानानि संस्थानकरणानि चः ।
व्याक्षेपजनकाः सर्व्वे नह्येते सिद्धिहेतवः ॥३११॥

सङ्गत्यागो मनः स्थैर्य्यं समाधितत्त्वनिर्ण्णयः ।
सिद्धिहेतुर्भवन्त्येते शेषा व्याक्षेपकारकाः ॥३१२॥

सर्व्वसत्त्वेषु कारुण्यं वैराग्यं विषयेषु च ।
आकिञ्चन्यञ्च सर्व्वत्र योगस्योपनिषत्परा ॥३१३॥

दयावान् सर्व्वभूतेषु विरक्तोऽकिञ्चनो मुनिः ।
गुप्तशिश्नोदरो योगी मनः शमयतीक्षणात् ॥३१४॥

लक्षं शिवो धनुर्द्देहो मौर्व्वी नादः शरो मनः ।
बुद्ध्या निरूप्य वेद्धव्यं यथा नान्यत्र गच्छति ॥३१५॥

यथैव हि धनुष्पाणिर्न्नित्याभ्यासोर्ज्जितोऽपि सन् ।
इषुणैव हनेल्लक्ष्यं नाक्षिहस्तधनुर्ग्गुणंः ॥३१६॥

तथैव त्यक्तसङ्गेन चित्तेनैकेन लभ्यते ।
फलं योगस्य तच्छेषा यन्त्रोपकरणाः स्मृताः ॥३१७॥

आदौ पूरकहस्तेन देहचापं प्रपूरयेत् ।
बुद्धिदृष्टया ततो योगी बिन्दुलक्ष्यं निरीक्षयेत् ॥३१८॥

आपूर्य्य देहचापस्थं प्रेर्य्य नादगुणेन तु ।
प्राणयुक्तं मनोबाणं लक्ष्यमध्ये प्रपातयेत् ॥३१९॥

गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथवा यतिः ।
सङ्गत्यागी लभेन्मोक्षं स्वकर्म्म निरतोऽपि सन् ॥३२०॥

स्त्रीभिः शूद्रैर्ग्गृहस्थैर्व्वा म्लेच्छैर्व्वर्ण्णाधमैरपि ।
लभ्यन्ते कर्म्मयोगज्ञैर्न्न जातिस्तत्र कारणं ॥३२१॥

तिष्ठन् गच्छन् स्वपन् भुञ्जन् कम्मर्णा व्यापृतो ऽपि सन् ।
चित्रेनैकेन यो लक्ष्यं कर्म्मयोगी न मुञ्चति ॥३२२॥

मनसा धारयेत् प्राणान् प्राणायाममैस्तथा मनः ।
एवं ध्यायेत् परं ब्रह्मा नान्यत् किञ्चिद् विवर्त्तयेत् ॥३२३॥

दीर्घाण्यङ्गानि विन्यासं ह्रस्वं वक्त्रं तथैव च ।
हंस हंसेति यो वर्ण्णं वर्ज्जं (र्त्त) येत् परमं पदं ॥३२४॥

प्राणायामं प्रकुर्व्वीत परिश्रान्तो भवेद्यदा ।
कैवलं मानसं योगं तदा योगी समारभेत् ॥३२५॥

यत्सम्बद्धं कथं वापि कुर्य्याज्जापञ्च मानसं ।
न तु शून्येन मनसा कवितव्यं तदा बुधैः ॥३२६॥

यदा शून्या भवेद् बुद्धिस्तस्मात्तेष्वनुरज्यते ।
ततो लब्ध्वावकाशन्तैरिन्द्रियैर्ह्रियते मनः ॥३२७॥

तस्मात् सर्व्वप्रयत्नेन चित्तमादौ विशोधयेत् ।
योगिनः शुद्धचित्तस्य सिद्धिर्हस्ततले स्थिता ॥३२८॥

रूपादीन् प्राप्य विकृतिं गच्छन्ति नयनादयः ।
निर्व्विकारा भवन्त्येते तन्मात्राणामसम्भवे ॥३२९॥

तस्माद् रूपादयो मिथ्या (ऽनित्या) शून्या इत्यापि भावयेत् ।
तदभावादिन्द्रियाणां शुद्धि समुजायते ॥३३०॥

हेतो सकाशाज्जायन्ते सुखदुःखादिबुद्धयः ।
निराश्रयस्य चित्तस्य विकल्पो नैव विद्यते ॥३३१॥

तस्माद्धेतोरभावत्वं शून्यत्वं वापि भावयेत् ।
निमित्ताभावयोगन्तु निर्विकल्पं मना भवेत् ॥३३२॥

इत्येते षोडश प्रोक्ता उपाया योगसाधनाः ।
तान् सम्यग् यो विजानाति स योगीत्यभिधीयते ॥३३३॥

आलोक्यात्यन्तगुह्यर्थं शास्त्रं सनकनिर्मितं ।
वस्तुमात्रं समादाय धर्म्मशीलस्य सूनुना ॥३३४॥

सखावबोधा बालानां प्रथिता संहिता मया ।
निरूप्य दातुमर्हन्ति दोषांस्त्यक्त्वा मनीषिणः ॥३३५॥

ये चित्तानि सुतृष्णयैव सततं क्लिश्यन्ति ये चापरे
स्वाम्याज्ञाश्रवणस्पृहा अनुदिनं तिष्ठन्ति राजाङ्गने ।
ये चान्ये मदिरासवादिविविधस्वादेन सम्मूर्च्छिता–
स्तैर्य्योगस्य फलं सतां बहुमतं नास्वाद्यते तत्सुखं ॥३३६॥

**इति धर्मपुत्रिकायां संहितायां सिद्ध्युपायोनाम षोडशः पटलः ॥१६॥**

=============== हरि ॐ तत्सत् ===========